Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 5 | ISSN : 2581- 6306

# श्रीमद्भगवद्गीतायाः दार्शनिकसिद्धान्तानां वर्तमाने उपादेयता



सुमन
असिस्टेन्ट प्रोफेसर
राजकीय महिला महाविद्यालय जींद,
भारत।

**Article Info**

Volume 3, Issue 5

Page Number: 48-56

Publication Issue :

September-October-2020

**Article History**

Accepted : 03 Sep 2020

Published : 20 Sep 2020

**शोध सारांशिका : –**

श्रीमद्भगवद्गीता विश्वपटले तदा अवतरिता यदा युद्धस्य मृत्योः भयाशान्तेश्च वातावरणमासीत्। श्रीमद्भगवद्गीता वर्तमाने धर्मस्य कृते न प्रत्युत जीवनं प्रति स्वदार्शनिकसिद्धान्तानां कारणाद् विश्वस्य मानवानां ध्यानमाकर्षयति। निष्कामकर्मणः संदेशः प्रबन्धनगुरूनपि प्रलोभयति। अद्य वर्तमानजीवने मानवस्य प्रमुखावश्यकता स्वाभ्यन्तरबाह्यसंतुलनस्य विद्यते। एतद्कर्म स दैनन्दिनकार्येषु स्थापयति चेत् कामक्रोधलोभमोहेर्ष्याद्वेषादिभ्यः दूरीभवति। येन तस्य कार्येषु सामंजस्यं जायते तेन स सर्वान् प्रेमभावनया पश्यति। कालक्रमेण तदेव निष्कामकर्मणि परिणमति। तदेव दर्शनस्य साफल्यं गीतायाश्च।

**बीज शब्द :** श्रीमद्भगवद्गीता, वर्तमानजीवनः, दार्शनिकसिद्धान्तानः, मानवः, विश्वः।

भगवद्गीताया महत्तां प्रतिपादयन् आचार्यशंकरो गीताभाष्यस्य भूमिकायां लिखति–"इदं गीताशास्त्रं समस्तवेदार्थसारसंग्रहभूतम्"।। गीता उपनिषद्दर्शनानां च सारसंक्षेप एवास्ति।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

वर्तमानकाल एते सिद्धान्ताः कथमुपयोगिनः स्युरिति विचारणायाः प्राग् वयं वर्तमानपरिप्रेक्षे दृष्टिपातं कुर्मः।

सृष्टेरारम्भतोऽधुनापर्यन्तं सर्वत्र पातोत्पातो दृश्यते। पातोत्पातस्य केन्द्रबिन्दुमनुष्य एव यतोहि अस्मिन् भूतले सैव विवेकशीलः। अन्ये पदार्था वस्तुनो ग्रन्थाः शास्त्रास्तदर्थमेव सन्ति। मनुष्यसहिताः सर्वे प्राणिनः सुखं इच्छन्ति दुखस्य च निवृत्तिम्। तदर्थमेव तषां सर्वाश्चेष्टाक्रियाश्च भवन्ति। मनुष्य स्वज्ञानानुसारं सुखप्राप्त्यर्थं दुखनिवृत्यर्थं च सुकरं मार्गं स्वीकरोति। सामान्यमनुष्यस्य ज्ञानं अपूर्णं भ्रान्तियुक्तं च भवति। सुखप्राप्तिकामोऽपि स विपरीतमार्गाश्रयेण दुखमेव प्राप्नोति। स पञ्चज्ञानेन्द्रियैः संसारे सुखं अन्विष्यति। तेनापि तस्य जीवने प्रसन्नताया अभाव एव। अपि च कामक्रोधलोभमोहेर्ष्याद्वेषादयः प्रवर्धन्तः सन्ति यस्य परिणामरूपेण भ्रष्टाचार आतंकवादो अश्वेतधनमनियन्त्रितोपभोगप्रवृत्ति चौर्यं लुण्ठनं परद्रव्यापहरणं स्त्रीणामसुरक्षितं जीवनं पितृगुरुजनानां च तिरस्कारः भूमण्डलेऽत्यधिकोष्णताया वृद्धि ( ग्लोबल वार्मिंग ) ओजोनस्तरे छिद्रः समुद्रजलेषु वृद्धि विविधा रोगव्याधयश्च सर्वत्र जरीजृम्भन्तः सन्ति। एतासां समस्यानां प्रमुखकारणमविद्या अस्ति। ज्ञानस्य स्रोतो दर्शनेषूपनिषत्सु च विद्यते। दर्शनेषु दुखं दुखकारणं तस्य समाधानं च व्याख्यातमस्ति। अस्मिन् शोधपत्रे गीतामधिकृत्य दार्शनिकसिद्धान्तानामेव विवेचनं करिष्याम्यहं।।

आसक्तिः– सर्वेषां दुखानां मूलं कारणं आसक्तिरेव। आसक्तिः सङ्ग– नाम्नाप्युच्यते। कस्यापि वस्तुनो व्यक्तिनो वा सार्धं स्वस्वामीभावसम्बन्ध एव सङ्गः। मनुष्यः पुत्रपौत्रधनज्ञातिषु सर्वत्र ममत्वमेव पश्यति यदा कुत्रापि तस्य ममत्वे शिथिलता जायते तदा स दुखी भवति। अत एव भगवान् श्रीकृष्णो मोहग्रस्तमर्जुनं सङ्गस्य परित्यागायोपदिशति।

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनंजय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ।। [1]

आसक्तेरुत्पत्ति कस्यचिद् वस्तुनो ध्यानात् भवति। अधिकध्यानकारणेन तस्मिन् व्यक्तिनि वस्तुनि वा सङ्ग उत्पद्यते। सङ्गकारणेन कामः समुत्पद्यते कामस्यापूर्तौ क्रोधो अभिजायते क्रोधकारणेन मनुष्यः सम्मोहितो भवति सम्मोहनेन अधीतं स्मृतं सर्वं नष्टं भवति। कामक्रोधमोहादयः समत्पद्यन्ते । क्रोध एव पारम्पर्यक्रमेण बुद्धिभ्रंशं करोति । बुद्धिनाशे सति मनुष्यपशोः भेद एव समाप्नोति । अतः गीतायामुक्तमस्ति——

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते
सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते।।
क्रोधाद्भवति सम्मोहः सम्मोहत्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ।।[2]

इन्द्रियाणां नियन्त्रणम्—— इन्द्रियशब्दं आचार्यपाणिनिः अष्टाध्याय्यां ''इन्द्रियमिन्द्रलिंगमिन्द्रदृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा''[3] इत्यत्र इन्द्रियमित्यन्तोदात्तं शब्दरुपं घच् प्रत्ययान्तं निपातितमस्ति । ''इन्द्रस्य लिंगम् इन्द्रियम् '' इन्द्र इति आत्मा तस्य साधनं चक्षुरादिः इन्द्रिय नाम्ना उच्यन्ते । आत्मनः सहायार्थं ईश्वरेण एकादश इन्द्रियाणि प्रदत्तानि । तेषां नामानि—

श्रोत्रं त्वक्चक्षुषो जिह्वा नासिका चैव पंचमी।
पायूपस्थं हस्तपादं वाक्चैव दशमी स्मृता ।।[4]

एतेषु पंच श्रोत्रादीनि बुद्धीन्द्रियाणि नाम्ना तथा पायवादीनि पंच कर्मेन्द्रियाणि नाम्ना उच्यन्ते। ''एकादशं मनो ज्ञेयं'' ज्ञानकर्मेन्द्रियरुपेण मन उभयात्मकं वर्तते। ''इन्द्रियाणां विषयेष्वप्रतिपत्तिरिन्द्रियजय उच्यते ''। इन्द्रियाणि स्वस्वविषयं प्रति वेगेन गच्छन्ति विषयसेवनेन एतासां तृष्णा न शाम्यति । अपितु वर्धते एव——

न जातु कामः कामानामुपभोगेन शाम्यति ।

हविषा कृष्णवर्त्मेव भूय एवाऽभिवर्धते ।।[5]

एतासां बुद्धिद्वारा नियन्त्रणमत्यावश्यकमस्ति ।''बुद्धिं तु सारथिं विद्धि'' बुद्धि सदैव सारथिरिव मनादि इन्द्रियाणि नियम्येत। अभ्यासवैराग्याभ्यामेव इन्द्रियाणां नियन्त्रणं भवितुमर्हति। गीतायामपि उक्तमस्ति––

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ।।[6]

अभ्यास–वैराग्य– इन्द्रियाणां निरोधो अभ्यासवैराग्याभ्यामेव भवति । कोऽयं अभ्यास इति जिज्ञासायां ''तत्र स्थितौ यत्नोऽभ्यासः ''[7] वृत्तिरहितस्य चित्तस्य स्वरुपनिष्ठः परिमाणः स्थितिस्तस्यां यत्न उत्साहः पुनः पुनस्तत्वेन चेतसि निवेशनमभ्यास इत्युच्यते । अभ्यास : तपसा ब्रह्मचर्येण विद्यया श्रद्धया च संपादितः सत्कारवान्दृढभूमिर्भवति । श्रद्धा चेतसः संप्रसादः सा हि जननीव कल्याणी योगिनं पाति। श्रद्धायाः महत्ता गीतायां–

श्रद्धावाननसूयश्च श्रृणुयादपि यो नरः ।
सोऽपि मुक्तः शुभॉल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ।।[8]

द्वितीयो वैराग्यम्– ''दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्''[9] विरागस्य भावः कर्म वा वैराग्यम् । दृष्टेभ्यः श्रुतेभ्य अनुभूतेभ्यः विषयेभ्यः इन्द्रियाणां वशीकरणमव वराग्यम्। वैराग्यं यमनियमासनप्रणायामप्रत्याहारधारणाभ्यां एव सिद्धयति। एतेषां श्रद्धापूर्वकाभ्यासेन एव परब्रह्मणः प्राप्तिर्भवितुमर्हति । गीतायां प्रोक्तम्–

अथ चित्तं समाधातुं न शक्नोति मयि स्थिरम्। अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ।।[10]

ये जनाः ईश्वरं प्राप्तुमिच्छन्ति परं ज्ञानवैराग्यशून्याः सन्ति तेषां कृते योगाभ्यास एव श्रेष्ठतमोऽस्ति । पूर्वजन्मनः संस्कारकारणात् येषां मन वायुरिव चंचलो वर्तते । मनस

अस्थिरताया कारणेन ते विषयेषु लिप्ताः भवन्ति । एते विषया एव दुखस्य मूलकारणानि सन्ति । योगाभ्यास दुखस्य परिहारः –

अभ्यासाद्रमते यत्र दुखान्तं च निगच्छति ।[11]

स्थितप्रज्ञ–– परब्रह्मपरमात्मनि समाधौ वा स्थिता प्रज्ञा यस्य सः स्थितप्रज्ञ उच्यते । भगवद्गीतायां श्रीकृष्णं किंकर्त्तव्यविमूढमर्जुनः स्थितप्रज्ञस्य स्वरुपं पृच्छति–

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव। स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ।।[12]

परमकारुणिको भगवान् स्वशिष्यस्य जिज्ञासां समादधति–

दुखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः। वीतरागभयकोधः स्थितधीमंनिरुच्यते ।।[13]

सर्वान् कामान् यः प्रकर्षेण जहाति, त्यक्तपुत्रवित्तलोकैषणः, आत्मारामः स्थितप्रज्ञ उच्यते। य आध्यात्मिकादिषु दुखेषु प्राप्तेषु न प्रक्षुभति , सुखेषु प्राप्तेषु विगतस्पृहो भवति । यस्य रागद्वेषभयकोधादयः कल्मषाः दग्धाः ,सर्वेभ्यः सम्बन्धेभ्यः आत्मानं पृथक् पश्यति सैव स्थितिधीः । ईशोपनिषद् अपि इमम् पक्षं दृढीकरोति।

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति । सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ।।[14]

एतादृशी स्थितिः यदा मनुष्यस्य भविष्यति। तदा आत्महननं सम्बन्धविच्छेदं कलहं परदोषाविष्करणं न कोऽपि करिष्यति ।

त्रिगुणाः– त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।।[15]

अयं सम्पूर्ण चराचरात्मक संसारः त्रिगुणात्मकमस्ति। सत्वरजस्तमस इत्येते गुणाः प्रकृतिसम्भवाः सन्ति । एतेषां वियोगावस्था एव प्रलयनाम्ना उच्यते । सृष्टिदशायां एते गुणाः सर्वदा सम्पृक्ता एव उपलभन्ते । सांख्यदर्शनेऽप्युक्तमस्ति ''सत्वरजस्तमसां साम्यावस्था

प्रकृतिः''[16] सृष्टेः रचनायां गुणा एव कारणाः सन्ति । वैशेषिकदर्शने उक्तः– ''कारणगुणपूर्वकः कार्यगुणो दृष्टः''[17] इममेव सिद्धान्तं गीतापि दृढीकरोति। नासतो विद्यते भावो नाभावो विद्यते सतः ।

उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्वदर्शिभि : ।।[18]

अर्थात् विद्यमानस्य (सत्) अभाव अविद्यमानस्य ( असत् ) च भावो न कदापि भवति । जडचेतनरुपेण संसार उभयात्मकस्ति। जडपदार्थेषु तमोगुणस्य प्रमुखता भवति । मनुष्येषु रजो गुणस्य देवेषु च सत्वगुणस्य। एते गुणाः गतिशीलाः सन्ति अतः क्षणे क्षणे मनसः स्थितिपरिवर्तनं कुर्वन्ति। यदा सुखज्ञानयो अनुभूतिर्जायते तदा सत्वस्योद्रेको भवति । यथा –

तत्र सत्वं निर्मलत्वात्प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ।।[19]

रजो रागात्मकं विद्धि यतोहि अस्य वर्तमानतायां मनुष्यः रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः हर्षशोकान्वितो भवति। तमसः स्थितौ मनुष्यः अयुक्तः प्राकृतः स्तब्धः शठोऽनैष्कृतिकोऽलसः विषादी दीर्घसूत्री भवति। सुखैश्वर्यं दुखदारिद्रयं धर्माधर्मं प्रवृत्तिं निवृत्तिं बन्धं मोक्षं कार्याकार्यं भयाभयं एतेषां कारणादेव भवति । सत्वगुणेन मनुष्यः ऊर्ध्वं गच्छति । इन्द्रियनिग्रहयोगाङ्गानुष्ठानेन च कोऽपि मनुष्यः सात्विकीं स्थितिं लब्धुमर्हति । सम्पूर्णजगतः वर्णनं अस्मिन् श्लोके वर्तते––

ऊर्ध्वं गच्छन्ति सत्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृतिस्था अधो गच्छन्ति तामसाः ।।[20]

मुक्ति– ''मुन्चन्ति पृथग्भवन्ति जना यस्यां सा मुक्तिः निश्रेयसमोक्षापवर्गाः मुक्ते एव अपरनामानि सन्ति । ''तदत्यन्तविमाक्षोऽपवर्गः –दुखजन्मप्रवृतिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः''[21]

दुखजन्मप्रवृति इत्यादीनामत्यन्त अर्थात् पूर्णरुपेण अपायविघातो वा मुक्तिः । गीतायां मुण्डकोपनिषदि च मुक्तिविषये साम्यमस्ति । गीतायां यथा –

ते तं भुक्त्वा स्वर्गलोकं विशालं

क्षीणे पुण्य मर्त्यलोकं विशन्ति ।[22]

मुण्डकोपनिषदि च–

ते ब्रह्मलोके ह परान्तकाले परामृतात् परिमुच्यन्ति सर्वे।।[23]

मुक्तात्मा परान्तकालपर्यन्तं मोक्षसुखमनुभूय पुनः प्ण्यक्षये सति अस्मिन् जगति जन्म लभते । गीतायां शुभाशुभफलानां परिणाम एव मुक्ति ।

शुभाशुभफलैरेवं मोक्ष्यसे कर्म बन्धनैः ।
सन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि।।[24]

अर्थात् यो जनः शुभाशुभकर्मणां बन्धनात् विमुक्तो भूत्वा निष्कामभावेन कार्याणि सम्पादयति स कर्मफलैर्मुच्यते। कर्मेष्वासक्तिः बन्धनकारिका विरक्तिश्च मुक्तिविधायिका भवति। एतदेव योगदर्शने ईश्वरप्रणिधाननाम्ना उच्यते 'ईश्वरप्रणिधानं च सर्वक्रियाणां परमगुरावर्पणं तत्फलसंन्यासो वा'।

निष्कर्षः– श्रीमद्भगवद्गीता विश्वपटले तदा अवतरिता यदा युद्धस्य मृत्योः भयाशान्तेश्च वातावरणमासीत्। श्रीमद्भगवद्गीता वर्तमाने धर्मस्य कृते न प्रत्युत जीवनं प्रति

स्वदार्शनिकसिद्धान्तानां कारणाद् विश्वस्य मानवानां ध्यानमाकर्षयति। निष्कामकर्मणः संदेशः प्रबन्धनगुरूनपि प्रलोभयति। अद्य वर्तमानजीवने मानवस्य प्रमुखावश्यकता स्वाभ्यन्तरबाह्यसंतुलनस्य विद्यते। एतद्कर्म स दैनन्दिनकार्येषु स्थापयति चेत् कामक्रोधलोभमोहेर्ष्याद्वेषादिभ्यः दूरीभवति। येन तस्य कार्येषु सामंजस्यं जायते तेन स सर्वान् प्रेमभावनया पश्यति। कालक्रमेण तदेव निष्कामकर्मणि परिणमति। तदेव दर्शनस्य साफल्यं गीतायाश्च।

सन्दर्भाः –


1. श्रीमद्भगवद्गीता 2/48
2. तदेव 2/62–63
3. अष्टाध्यायी 5/2/93
4. मनुस्मृति 2/90
5. तदेव 2/94
6. श्रीमद्भगवद्गीता 2/68
7. योगदर्शन 1/13
8. श्रीमद्भगवद्गीता 18/71
9. योगदर्शन 1/15
10. श्रोमद्भगवद्गीता 12/09
11. तदेव 18/36
12. तदेव 2/54
13. तदेव 2/56
14. इशोपनिषद् 6
15. श्रोमद्भगवद्गीता 07/13
16. सांख्यदर्शन 1/61

17. वशेषिकदर्शन 1/1/24
18. श्रोमद्भगवद्गीता 02/16
19. तदेव 14/06
20. तदेव 14/18
21. न्यायदर्शन 1/1/21
22. श्रोमद्भगवद्गीता 9/21
23. म्ण्डकोपनिषद् 3/2/6
24. श्रोमद्भगवद्गीता 09/28